PAPER - 1

# MT

2017 .... .... 1100

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - I**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १
मेघः पापं वृष्टिरूपेण पातयति यतः.........
(जलस्य बाष्पं भवति। / जीवनं स्वकर्माधिष्ठितम्।)

(ii) कः कं वदति । १
अहं तु जीवनदाता ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
सत्कर्मणा पुण्यं भवति ।

तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर, सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति। सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं गृह्णामीति सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति । बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति । तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति? मेघः भणितवान्, न किमपि करोमि। अहं तु जीवनदाता । जीवनं स्वकर्माधिष्ठितम् । अतः यस्य यत्पापमस्ति तत्तस्य गृहशिखरे वृष्टिरूपेण पातयामीति। एतन्निशम्य यात्री मनस्यकरोत् यद् उचितप्रायश्चित्तं विना पापान्मुक्तिरशक्या । अतः सत्कर्मानुसरणमेव सर्वथा श्रेयस्करमिति ज्ञातमधुना मया ! जीवने सदाचारी भूत्वैव पुण्यसञ्चयं करिष्ये । पापाचरणं कृत्वा तस्य भारं न कस्मा अपि दास्ये इति विचिन्त्य प्रशान्तमनसा स स्वगृहमगच्छत् ।

२. 'जीवनं स्वकर्माधिष्ठितम्' एषा सङ्कल्पना माध्यमभाषया स्पष्टीकुरुत । २

**प्र.१. ब) गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १
जनाः तेषु कार्यालयेषु अधिकमूल्यं ददति यतः .......... ।
(ते तेषां कार्यस्य सत्वरसिद्धिम् इच्छन्ति । / तेषां कार्याणि महार्घाणि सन्ति ।)

(ii) पूर्णवाक्येन उत्तरत । १
केषां कार्यसिद्धिः नित्यमेव कष्टसाध्या भवति ?

(iii) योग्यं वा अयोग्यमिति लिखत । १
न्याय्यपथगामिनः जनाः विरलाः सन्ति ।

कुमारः - स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया । किमेष अवैधाचारः ?
जनकः - अथ किम् । महानेष अपराधः । यतः तेन विधिभङ्गः भवति । अवैधाचारेण भ्रष्टजनानां कार्यसिद्धिः भवति किन्तु तेन जनसामान्याः स्वाधिकारवञ्चिताः भवन्ति। कार्यसिद्ध्यर्थं वैधाचारः उचितः । अतः कस्यापि वस्तुनः निश्चितमूल्यं दत्त्वैव क्रयणमुचितम् ।
कुमारः - किन्तु भवत्सदृशानां केषांचिज्जनानामेव मतिरेषा । न्याय्यपथानुसारिणः सत्यमार्गगामिनः तु कार्यसिद्धिः नित्यमेव कष्टसाध्या भवति । अङ्गुलिमात्रगणनीयानां धीराणां न्याय्यमार्गानुसारेण किम् ?
जनकः - जात, पश्य एकोऽपि चन्द्रमाः तमो हन्ति विश्वं धवलयति च । एवमेव एकोऽपि सत्यगामी मनुजः समस्तं जनसमूहं प्रेरयति । न्याय्यपथगामिनः विरलाः जनाः समाजं परिवर्तयितुं समर्थाः । यथा दीपेनैकेन दीपमाला प्रज्ज्वाल्यते तथा एकस्य वैधाचारेण अन्ये जनाः वैधाचारिणः भवेयुः।

**२. पृथक्करणम् ।**
**मेलनं कुरुत ।** २

| | |
|---|---|
| i) चन्द्रमाः | समाजं परिवर्तयन्ति । |
| ii) न्याय्यपथगामिनः जनाः | दीपमालां प्रज्वलति । |
| iii) दीपः | जनसमूहं प्रेरयति । |
| iv) सत्यगामी मनुजः | विश्वं धवलयति । |

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

i) समूहेतरपदं लिखत । १
आपत्तिः, विपत्तिः, सम्पत्तिः, सङ्कटम् ।

ii) चतुर्थपदं लिखत । (विशेषण - विशेष्य - अन्वितिः ।) १
१) जन्तवः : क्षुद्राः :: सर्वाङ्गम् : ...... ।
२) गुप्तचराः : आगताः :: कोटरः : ...... ।

(iii) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-अव्यये लिखत । १

दीर्घसमयोऽतीतः । अज्ञातवासकाले शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत् । निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः । कांश्चन गुप्तचरान् तं प्रति एवागच्छतः सः दृष्टवान् । सः व्यचिन्तयत्, ''अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत् । किं करणीयमधुना ।'' इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः । तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः । वृक्षे महान् कोटरः आसीत् । कोटरं प्रविश्य अर्जुनः तत्रैव निभृतः स्थितः । तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत् । अर्जुनमन्विष्यन्तः तत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः । एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान् ।

२. **पृथक्करणम् ।** २




**द्वितीयः विभागः - पद्यम् ।**

प्र.२ अ) **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

पारीनगर्याः खलु कण्ठभागे मालेव सीनाख्यनदी सुलग्ना ।
महासुखं यत्र जना लभन्ते नौकाविहारस्य तटभ्रमैश्च ।।१।।
ततस्तटे सीनसरित्समीपे गॉथीक-स्थापत्यकलात्मरूपम् ।
न्यायस्य प्रासाद इति प्रसिद्धमैतिह्यमुक्तं भवनञ्च दृष्टम् ।।२।।
समीपमाराधनमन्दिरं च सेन्ट्-चेपलं विश्रुतमस्ति नाम ।
मूर्ध्नोऽस्य तीक्ष्णस्तनुरग्रभागो नभस्थितं दर्शयतीव देवम् ।।३।।
विख्यातनाम्नी खलु जोनदेवी सुमार्गमध्येऽस्ति तदीयमूर्तिः ।
अश्वाधिरूढा स्वकरे गृहीत्वा ध्वजं समुत्तोल्य विराजते सा ।।४।।

१. **पृथक्करणम् ।** २



२. **शब्दज्ञानम् ।** १

**चतुर्थपदं चित्वा लिखत ।**

१) गगनम् : नभः :: विख्यातम् : ...... ।

२) प्रासादः : भवनम् :: शिरः : ...... ।

**प्र.२ ब) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भोजनान्ते पिबेत्तक्रं वासरान्ते पिबेत् पयः ।
निशान्ते च पिबेद्वारि त्रिभी रोगो न जायते ।।१।।
यत्रोत्साहसमारम्भो यत्रालस्यविहीनता ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ।।२।।

१. **पूर्णवाक्येन उत्तरत ।** १

वासरान्ते किं पिबेत् ?

२. **तात्पर्यलेखनम् ।** २

द्वितीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २

१. उपानहौ ....... च ।।

२. पात्रापात्र....... विषम् ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| १. अद्रोहः सर्वभूतेषु | i) मुहुर्मुहुर्वारि पिबेदभूरि । |
| २. धर्मार्थकाममोक्षाणाम् | ii) न वेत्ति निर्गुणः । |
| ३. तस्मान्नरो वह्निविवर्धनाय | iii) कर्मणा मनसा गिरा । |
| ४. बली बलं वेत्ति | iv) न वेत्ति निर्बलः । |
| | v) आरोग्यं मूलमुत्तमम् । |

## तृतीयः विभागः - व्याकरणम् ।

प्र.३ **यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

अ) **नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | प्रथमा एकवचनम् | सम्बोधन बहुवचन | सप्तमी बहुवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(नद्यः, भवती, तेषु, यात्री, सर्वे, कार्यालयेषु)

आ) **क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(लङ्घयेत्, अस्ति, बभूव, भवतु, अचिन्तयत्, ज्ञास्ये)

इ) **समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २
**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत ।**

| | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| (i) | अधिकं मूल्यम् । | १) नञ् बहुव्रीहि |
| (ii) | सुष्ठु हताः । | २) उपपद - तत्पुरुषः |
| (iii) | नयः च विक्रमः च, तयोः। | ३) बहुव्रीहिः |
| (iv) | न विद्यते कायः यस्य सः। | ४) प्रादि - तत्पुरुषः |
| (v) | धनुः धरति इति। | ५) कर्मधारयः |
| (vi) | कन्दुकस्य आकारः येषां ते । | ६) इतरेतरद्वन्द्वः |

ई) **उपपद-विभक्तिः ।** २
**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ............ समीपे स्थित्वा सेवां कृतवान् । ( तद् / तम् / तस्य )

(ii) कश्चन गोन्दिया - निवासी यात्री एकदा............ जगाम । (काशीनगरात् / काशीनगरे / काशीनगरं)

(iii) कांश्चन गुप्तचरान् ............ प्रति एवागच्छतः सः दृष्टवान् । (तस्य / तेन / तं)

(iv) .......... पुरतः सूर्यखगः तत्रोपस्थितः । ( तेन / तम् / तस्य )

(v) अलं ..............। (विवाद / विवादम् / विवादेन)

(vi) ........... अभितः वृक्षाः सन्ति । (गृहम् / गृहस्य / गृहात् )

उ) **सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) एतच्छ्रुत्वा = एतत् + ....... ।

(ii) निरम्बुपानाच्च = ....... + च ।

(iii) घर्षयेद्दन्तम् = घर्षयेत् + ....... ।

(iv) ....... = देशाभिमानः + च ।

(v) कृतेऽपि = ....... + अपि ।

(vi) ....... = मनसि + अकरोत् ।

**ऊ) सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) चित्रकलायां .................. प्रधानवर्णाः विदिताः । (5)

(ii) देवः, मनुष्यः, दानवः, च प्रजापतेः .................. पुत्राः । (3)

(iii) चित्रकलास्पर्धायां अहं ............. क्रमाङ्केन उत्तीर्णः । (1st)

(iv) महाभारतस्य ............. सर्गः रमणीयः । (3rd)

(v) दिनस्य ............. दन्तधावनं कुर्यात् । (twice)

(vi) सप्ताहस्य ............. अहं मन्दिरं गच्छामि । (once)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| पारितोषिकं | कस्मै | रोचते । |
| मिष्टान्नं | कुत्र | दातव्यम् । |
| पुस्तके | केन | आनीतम् । |
| कमलं | किमर्थं | वर्तते । |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

एकदा सर्वे ग्रामस्थाः सम्मिल्य एकस्य ग्रामीणस्य विषये चर्चाम् अकुर्वन्। बहुभिः जनैः स प्रशंसितः। अन्ततः एकः जनः अवदत् सः उत्तमः जनः अस्ति, इत्यत्र नास्ति ....... । परन्तु तस्मिन् द्वौ दोषौ वर्तेते इति मे प्रतिभाति। तच्छ्रुत्वा अपरः अपृच्छत् कौ तौ दोषौ ? ....... इच्छामि। सः शीघ्रकोपी तथा कोपावेशे सः कार्याकार्यविवेकं न रक्षति। संयोगवशात् यस्य विषये वार्तालापः प्रचलितः आसीत् स एव तत्र आगतः। अन्तिमं वाक्यं तस्य श्रवणपथे आपतितम्। स्वस्य आलोचकस्य उपरि उत्पत्य ग्रीवया तं गृह्णन् सः अपृच्छत्, रे शठ, मां ....... इति वदसि ? किं ते धाष्ट्र्यम्। तव कण्ठनोदनं करोमि अधुना। उपस्थिताः अन्ये जनाः तस्य रक्षणार्थं प्रयतमानाः अवदन्, भवान् स्वयमेव प्रमाणीकृतवान् यत् तस्य .......न मिथ्या।

(ज्ञातुम्, शीघ्रकोपी, सन्देहः, आलोचना)

**Best of Luck**